सप्तदशः पाठः

समाज निर्माणे नारीणां भूमिका



वैदिकवाङ्मये अपाला - घोषा - लोपामुद्रा -प्रभृतयः विदुष्यः नार्यः अभवन्। गार्गी ब्रह्मवादिनी, तीक्ष्णबुद्धिः अध्यात्मतत्त्वस्य विवेचिका आसीत् सा याज्ञवल्क्येन सह शास्त्रार्थमकरोत् तथा याज्ञवल्क्यं निरुत्तरम् अकरोत्। याज्ञवल्क्यपत्नी मैत्रेयी अपि प्रज्ञावती सूक्ष्मविवेचिका चासीत्। आचार्यमण्डनमिश्रस्य पत्नी भारती अतीव विदुषी साक्षात् सरस्वत्यवतारभूता आसीत्। तस्याः वैशिष्ट्यमिदं यत् आचार्यशङ्करेण सह सा

मण्डनमिश्रस्य शास्त्रार्थे निर्णायिकाऽभवत्। यदा मण्डनमिश्रः पराजितोऽभवत् तदा स्वयमपि सा शास्त्रार्थं शङ्करेण सह कृतवती।

आधुनिके काले-विमानचालने, चन्द्रगमने, जलयानचालने महिलाः अग्रेसरन्ति। पुरुषवत् स्त्रियः अपि सार्वजनिकराजकीयसेवासु संलग्नाः दृश्यन्ते। व्यापारे, आपणेष्वपि तासां संख्या पुरुषापेक्षया न्यूना नास्ति। सम्प्रति राजनीतौ अपि स्त्रियः पुरुषैः सार्धं सहयोगितया प्रगतिं कुर्वन्ति। ताः पार्षदविधायक-सांसदेत्यादीनि पदानि चालंकुर्वन्ति। भाषणेऽपि तासाम् ओजस्विता अवलोक्यते। किं बहुना, राष्ट्रपति - प्रधानमन्त्रि - मन्त्रि - प्रभृतीनि महत्त्वपूर्णानि पदानि भूषयन्त्यः गौरवं लभन्ते। क्रिकेट - बालीबाल - टेनिसेत्यादिषु पाश्चात्यक्रीडाक्षेत्रेष्वपि नवाः युवतयः बालिकाश्च देशान्तरेषु गत्वा विजयं प्राप्य जगति भारतस्य मानं वर्धयन्ति। आधुनिक समये तु कबड्डीभारोत्तोलनसदृशीषु भारतीयक्रीडास्वपि ताः स्पर्धन्ते। सम्पन्नायाम् ओलम्पिकक्रीडाप्रतिस्पर्धायां भारोत्तोलने कर्णममल्लेश्वरी पदकं प्राप्तवती। शिक्षाक्षेत्रेऽपि युवतयः प्राध्यापकाचार्यपदेषु प्रतिष्ठिताः सन्ति। केवलं न कुलपतिपदं प्रत्युत मन्त्रिपदमपि ताः भूषयन्ति। एवं हि नार्यः समाजस्य सर्वेषु कर्मक्षेत्रेषु महत्त्वपूर्ण योगदानं कुर्वाणाः राष्ट्रस्य अभ्युन्नतौ संलग्नाः सन्ति।

शब्दार्थः

ब्रह्मवादिनी = ब्रह्मविषयक ज्ञान में निष्णात। **परमतत्त्वचिन्तने** = अध्यात्म तत्त्व के चिन्तन में। **प्रज्ञावती** = बुद्धिमती। **दक्षा** = समर्थ। **समकक्षताम्** = समानता को। **आपणेषु** = दुकानों मंे। **सहयोगितया** = (सहयोगी के रूप में) कंधे से कंधा मिलाकर। **भूषयन्तः** = शोभित करती हुई। **पुष्णाति** = पुष्ट करता है। **सरस्वत्यवतारभूता** = (सरस्वति$अवतारभूता) सरस्वती का अवतार। **अग्रेसरन्ति** = आगे चलती हैं। **आपणेष्वपि** = (आपणेषु+अपि) बाजारों में भी। **सांसदेत्यादीनि** = (सांसद+इत्यादीनि) सांसद इत्यादि। **अभ्युन्नत**= अधिक ऊँचा।

1. उच्चारणं कुरुत पुस्तिकायां च लिखत-

विदुष्यः तीक्ष्णबुद्धिः अध्यात्मतत्त्वस्य सरस्वत्यवतारभूतः वैशिष्ट्यमिदम् कबड्डीभारोत्तोलनसदृशीषु ओलम्पिकक्रीडा-प्रतिस्पर्धायाम्

2. पूर्णवाक्येन उत्तरत -

(क) समाजस्य निर्माणे कासां महती भूमिका स्वीक्रियन्ते ?

(ख) समाजस्य कल्याणं कदा भवति ?

(ग) प्राचीनकाले अस्माकं देशे काः विदुष्यः आसन् ?

(घ) विदुष्यः नार्यः काः ?

(ङ) गार्गी केन सह शास्त्रार्थमकरोत् ?

(च) मैत्रेयी कीदृशी आसीत् ?

(छ) आधुनिके समाजे स्त्रियः केषु क्षेत्रेषु स्वीकायं योगदानं कुर्वाणाः दृश्यन्ते ?

3. पदेषु सन्धि-विच्छेदं कुरुत -

पदम् सन्धि-विच्छेदः

तथैव ....

चन्द्रोपरि ....

क्षेत्रेऽपि ....

शास्त्रार्थे ....

अभ्यासः

4. निम्नलिखितपदेषु उपसर्गं लिखत -

पदम् उपसर्गः

विजयम् ....

संलग्नः ....

प्रचलितः ....

प्राध्यापकः ....

5. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत -

(क) वैदिक वाङ्.मये नार्यः............................ अभवन्।

(ख) साम्प्रतं मनुष्याणां............................. परिवर्तिता।

(ग) मण्डनमिश्रस्य पत्नी .... अतीव विदुषी आसीत्।

(घ) भारोत्तोलने............ पदं प्राप्तवती।

6. संस्कृतभाषायाम् अनुवादं कुरुत -

(क) समाज में स्त्री और पुरुष का महत्त्व समान है।

(ख) स्त्री और पुरुष की समानता की भावना प्राचीनकाल से है।

(ग) वह युद्ध तथा यज्ञों में भी भाग लेती थी।

(घ) माता बच्चों की प्रथम शिक्षिका होती हैं।

(ङ) इस समय भारतीय राजनीति में महिलाओं की महती भूमिका है।

7. 'मम माता' इति विषये संस्कृतभाषायां प×च वाक्यानि लिखत।

शिक्षण-सङ्केतः

स्त्रीपुरुषयोः समानतायाः स्वरूपं छात्रान् स्पष्टं कारयत।

विदुष्यः, कर्णममल्लेश्वरी, भारती, जीवनदृष्टिः।

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

पुनरावृत्तिः

1. दीर्घस्वराः के-के सन्ति, इति लिखत।

2. संयुक्तव्यञ्जनानां पञ्च उदाहरणानि लिखत।

3. निम्नलिखित-वर्णानाम् उच्चारणस्थानानि लिखत-

ई, ण, ए, ब, व।

4. अक्' प्रत्याहारे 'एङ्' प्रत्याहारे च के के वर्णाः भवन्ति, इति लिखत।

5. 'श', 'ष' स' चैतेषाम् उच्चारणस्थानानि वदत।

6. निम्नलिखितपदेषु सन्धि-विच्छेदं कृत्वा सन्धिनाम लिखत

पदम् सन्धि-विच्छेदः सन्धि-नाम

सूक्तिः ....

औषधालयः ....

तथापि ....

सूर्योदयः ....

7. निर्देशानुसारेण शब्दरूपाणि लिखत -

शब्दः रूपम्

'राम' शब्दस्य तृतीयाविभक्तेः बहुवचने ....

'रमा' शब्दस्य षष्ठीविभक्तेः एकवचने ....

'पुस्तक' शब्दस्य सप्तमीविभक्तेः बहुवचने ....

'नदी' शब्दस्य षष्ठीविभक्तेः एकवचने ....

8. शुद्धेषु उत्तरेषु (च्) चिह्नं योजयत्-

(क) कारकाणि सन्ति। (षट्/सप्त/अष्ट)

(ख) विभक्तयः सन्ति। (षट्/सप्त/अष्ट)

(ग) त्वं पठसि। (पुस्तकम्/पुस्तकस्य)

(घ) सीता फलं खादति। (मधुरः/मधुरम्)